॥ श्रीः ॥

# ॥ ತೋಟಕಾಷ್ಟಕಮ್ ॥

ವಿದಿತಾಖಿಲಶಾಸ್ತ್ರಸುಧಾಜಲಧೇ
ಮಹಿತೋಪನಿಷತ್ಕಥಿತಾರ್ಥನಿಧೇ ।
ಹೃದಯೇ ಕಲಯೇ ವಿಮಲಂ ಚರಣಮ್
ಭವ ಶಂಕರದೇಶಿಕ ಮೇ ಶರಣಮ್ ॥ ೧

ಕರುಣಾವರುಣಾಲಯ ಪಾಲಯ ಮಾಂ
ಭವಸಾಗರದುಃಖವಿದೂನಹೃದಮ್ ।
ರಚಿತಾಖಿಲದರ್ಶನತತ್ತ್ವವಿದಮ್
ಭವ ಶಂಕರದೇಶಿಕ ಮೇ ಶರಣಮ್ ॥ ೨

ಭವತಾ ಜನತಾ ಸುಹಿತಾ ಭವಿತಾ
ನಿಜಬೋಧವಿಚಾರಣಚಾರುಮತೇ ।
ಕಲಯೇಶ್ವರಜೀವವಿವೇಕವಿದಮ್
ಭವ ಶಂಕರದೇಶಿಕ ಮೇ ಶರಣಮ್ ॥ ೩

ಭವ ಏವ ಭವಾನಿತಿ ಮೇ ನಿತರಾಮ್
ಸಮಜಾಯತ ಚೇತಸಿ ಕೌತುಕಿತಾ ।
ಮಮ ವಾರಯ ಮೋಹಮಹಾಜಲಧಿಮ್
ಭವ ಶಂಕರದೇಶಿಕ ಮೇ ಶರಣಮ್ ॥ ೪

ಸುಕೃತೇಧಿಕೃತೇ ಬಹುಧಾ ಭವತೋ
ಭವಿತಾ ಸಮದರ್ಶನಲಾಲಸತಾ ।
ಅತಿದೀನಮಿಮಂ ಪರಿಪಾಲಯ ಮಾಮ್
ಭವ ಶಂಕರದೇಶಿಕ ಮೇ ಶರಣಮ್ ॥ ೫

ಜಗತೀಮವಿತುಂ ಕಲಿತಾ ಕೃತಯೋ
ವಿಚರಂತಿ ಮಹಾಮಹಸಶ್ಛಲತಃ ।
ಅಹಿಮಾಂಶುರಿವಾತ್ರ ವಿಭಾಸಿ ಗುರೋ
ಭವ ಶಂಕರದೇಶಿಕ ಮೇ ಶರಣಮ್ ॥ ೬

ಗುರುಪುಂಗವ ಪುಂಗವಕೇತನ ತೇ
ಸಮತಾಮಯತಾಂ ನಹಿ ಕೋಽಪಿ ಸುಧೀಃ ।
ಶರಣಾಗತವತ್ಸಲ ತತ್ತ್ವನಿಧೇ
ಭವ ಶಂಕರದೇಶಿಕ ಮೇ ಶರಣಮ್ ॥ ೭

ವಿದಿತಾ ನ ಮಯಾ ವಿಶದೈಕಕಲಾ
ನ ಚ ಕಿಂಚನ ಕಾಂಚನಮಸ್ತಿ ಗುರೋ ।
ದ್ರುತಮೇವ ವಿಧೇಹಿ ಕೃಪಾಂ ಸಹಜಾಮ್
ಭವ ಶಂಕರದೇಶಿಕ ಮೇ ಶರಣಮ್ ॥ ೮

ಇತಿ ಶ್ರೀತೋಟಕಾಚಾರ್ಯವಿರಚಿತಂ ತೋಟಕಾಷ್ಟಕಂ ಸಂಪೂರ್ಣಮ್ ॥